No. ४७०६

Title अग्निपुराणे पञ्चक्रोशयात्राविधानम्

Author +

Extent ३ पत्राणि Age सं. १८९१

Subject पुराण माहात्म्यादि

पंचक्रोशयात्राविधानम्

स्कन्दपुराणे

४७०६

4706

पद्मपुराणे
प्रायश्चित
८०

॥श्रीगणेशाय नमः॥ श्रीभगवानुवाच॥ पूर्वस्मिन्दिवसे ढुंढिं प्रजयित्वा हविष्यभुक्॥ प्रातः कृत्वाय धर्मात्मा कृतनित्यक्रियाः शुचिः॥१॥ जिते-
॥२॥ द्रियो जितक्रोधो निर्भयस्सह भार्यया। अतीव श्रद्धया युक्तो गच्छेद्विश्वेश्वरालयम्॥२॥ पश्चिमाभिमुखं देवमंबिकासहितं प्रभुं॥ प्रदक्षि-
णत्रयं कृत्वा नमस्कारैश्च पञ्चभिः॥३॥ निर्वाणमंडपे स्थित्वा क्षणं ध्यात्वा महेश्वरम्॥ प्राणायामत्रयं कुर्यात् उत्तराभिमुखः क्र- दु३
मात्॥४॥ बध्वांजलिं ततः प्रार्थयीत महादेवं महेश्वरं॥ पंचक्रोशस्य यात्रां वै करिष्ये ~~विधिवत्प्रभो~~॥५॥ प्रीत्यर्थं तव देवेश सर्वपापौघ-
प्रशान्तये॥ इति संकल्प्य मौनेन नमस्कृत्य पुनः पुनः॥६॥ ढुंढिशं च ततो गच्छेन्नत्वा मोदादिपंचकम्॥ दंडपाणिं ततो नत्वा मंत्रमे-
तमुदीरयेत्॥७॥ दंडहस्त महायुध योग भक्तानां तु मोहनं॥ वरप्रदान संपन्न दंडपाणे नमोस्तु ते॥८॥ अन्नदः प्राणदश्चैव ज्ञानदो
मोक्षदस्तथा। भक्तानां तपसां रक्षन् दंडपाणे नमोस्तु ते॥९॥ पंचक्रोशस्य यात्रार्थमनुज्ञां देहि भैरव॥ तत्रैव लब्ध्वानुज्ञां वै भैरव-
स्य महात्मनः॥१०॥ ततो गच्छेच्छनैः श्रीमान् यत्र वै मणिकर्णिका॥ तत्र स्नात्वा महादेवं नत्वा गच्छेद्यथासुखम्॥११॥ गणनाथं ततो नत्वा
भक्त्या सिद्धिविनायकम्॥ नमितां च महादेवीं जरासंधेश्वरं तथा॥१२॥ सोमनाथं वराहं च प्रजयित्वा ततः परं॥ नत्वा दक्षप्रजापते-
शीश्वं केदारेश्वरमेव च॥१३॥ स्नात्वा तीर्थे मानसकुंडे साक्षान्मोक्षप्रदे शुभे॥ संगमेशं ततो नत्वा तथा चार्कविनायकम्॥१४॥ क्षेत्र-
स्याग्नेयभागे तु स्थितं निर्विघ्नकारकम्॥ ततो वै दक्षिणे दुर्गां नत्वा दुर्गविनायकम्॥१५॥ स्नात्वा कुंडेऽमृते शुद्धे देवानामपि दुर्लभे
तिलान्धान्यं घृतपात्रं वस्त्रं दत्वा च शिवयोगिने॥१६॥ मध्ये नामाविधेर्भक्त्या पूजनीयो विनायकः॥ तत्रोषित्वा नरो भक्त्या कृत्वा जा- ॥२॥

गरलं शुभं ॥१७॥ ततः पश्चान्महादेवं कर्दमेश्वरमद्भुतं । सोमनाथं विरूपाक्षं नीलकंठं तथैव च ॥१८॥ स्नात्वा तीर्थे महापुण्ये देवं संपूज्य तत
तः ॥ प्रदक्षिणात्रयं कृत्वा नमस्कारांश्च पंच वै ॥१९॥ दृष्ट्वा रूपं महापुण्यं कर्दमेश्वर पश्चिमे । सोमनाथं ततो नत्वा चामुंडां नतिसुंद
री ॥२०॥ ततो गच्छेन्मुने श्रीमान् मोक्षेशं करकोटेश्वरम् ॥ वीरभद्रं ततो दुर्गां विकटाख्यां सभैरवां ॥२१॥ नीलकंठं ततो नत्वा कर्कोटे
श्वरं ततः । विमलां च महादुर्गां परिवारैश्च सेवितां ॥२२॥ वक्रतुंडं महाभीमं दृष्ट्वा कर्कोटमेव हि । ततो गत्वा महादेवं भृंगिं चैव नंदिके
श्वरम् ॥२३॥ गणाधिपं विरूपाक्षं यक्षेशं विमलेश्वरं ॥ ज्ञानेश्वरं च मोक्षेशं नेमेतेश्वरमेव च ॥२४॥ क्षेत्रस्य नैरृते भागे भीमचंडीं भय
करीं ॥ चतुःषष्टिसहस्रैस्तु स्त्रू परिवारैश्च शोभितां ॥२५॥ दुर्गा नामेनो नमस्या नो भीमरूपां सुदारुणां ॥ नत्वा प्रदक्षिणीकृत्य भीमचंड
विनायकं ॥२६॥ दिनमेकं वसेत्तत्र श्रद्धया भोजयेद्द्विजान् । तिलकं चापि पादौ च चर्चयित्वा शिवं शिवां ॥२७॥ प्रजनीया प्रयत्नेन भीमचं
डीं विशेषतः ॥ गीतनृत्यं च ... गच्छेच्छ्रीमान् दर्शनेश्वरानेः ॥२८॥ ध्यात्वा मां भैरवं नत्वा नत्वा हृदि सदा वसेत् । ... तनाथं च सोमेश्व
रनाथं कपर्दिनं ॥२९॥ नागेश्वरं च धामेशं वीरभद्रं च पंच च । क्षेत्रस्य पश्चिमे भागे श्रीदेहलीविनायकं ॥३०॥ गुडशर्करखंडाद्यैः पू
जयेच्च विनायकं ॥ मोदकैः पूजयेद्देवं धूपदीपैस्तथा बकैः ॥३१॥ अत्यंतमादरेणैव नत्वानुग्रहकारणं ॥ दर्शनाद्देवसर्वेषां
सर्वविघ्नविनाशनं ॥३२॥ ततो नत्वा तु वा यत्वा मुंडं ढुंढाख्यो विनायकम् ॥ सोमनाथं ततो नत्वा स्नात्वा तु वरणाजले ॥३३॥ तत्र श्राद्धं प्रकु
र्वीत दिनमेकं वसेद्बुधः ॥ रात्रौ जागरणं कार्यं

गीतनृत्यपुरस्सरं ॥३४॥ ततो गच्छेच्छनैश्श्रीमान्स्नात्वा चैव पदे पदे ॥ षष्टिकोटिसहस्राणि लिंगानि शुभदानि वै ॥३५॥ पारपारेश्वसेत्येव
॥२॥ मन्त्रसौख्यप्रदानि च ॥ ततो गत्वा महादेवं पाशपाणिविनायकं ॥३६॥ तत्रोपितामहा भक्त्या स्तुत्वा जागरणं शुभं ॥ पूजनीयं प्रयत्नेन पाश
पाणिविनायकं ॥३७॥ देवाश्च राक्षसाश्चान्ये लब्धक्षेत्रस्य संगमे ॥ पारपारेश्वसेत्येव निरुद्धाः पाशपाणिना ॥३८॥ नमस्कृत्वा प्र
यत्नेन दृष्ट्वेश्वरं ततो व्रजेत् ॥ महाक्षेत्रे वृषापि तु यत्र श्रीवृषभध्वजः ॥३९॥ तत्र स्नात्वा विधानेन तर्पयित्वा पितॄंस्तथा ॥ श्राद्धं
2 विधाय सुश्रद्धः प्रजयेद्वृषभध्वजं ॥४०॥ वसित्वा तद्दिने चैव श्रवणादि प्रकल्पयेत् ॥ प्रातस्स्नात्वा नमस्कृत्य प्रार्थयेद्वृषभ
ध्वजं ॥४१॥ ततो वाल्वो नुदानला नत्वा वैसंगमेश्वरं ॥ दृष्ट्वादिकेशवं स्नात्वा गंगावरणसंगमे ॥४२॥ सर्वपापविनिर्मुक्तो नत्वा खर्व
विनायकं ॥४२॥ अष्टौ विनायकाश्चैते सप्तमावरणे स्थिताः ॥४३॥ असंख्यातानि लिंगानि गंगातीरे पदे पदे ॥ असंख्यातानि तीर्थानि
सन्ति तत्र पदे पदे ॥४४॥ त्रिलोचनं महादेवं दृष्ट्वा देवस्य संनिधौ ॥ स्तुत्वा प्रदक्षिणीकृत्य नत्वा देवमुमापतिं ॥४५॥ स्नात्वा पंचनदे
तीर्थे नत्वा श्रीबिंदुमाधवं ॥ वासिष्ठ्या मदेवौ च ततो नत्वा यथादरं ॥४६॥ पर्वतेशं ततो नत्वा दृष्ट्वा तु मणिकर्णिकां ॥ तत्र स्ना
त्वा पुनः श्रीमान्नत्वा देवं महेश्वरं ॥४७॥ ततो गत्वा पुनर्ढुंढिनाम भक्त्या सिद्धिविनायकं ॥ स्मृत्वा गणपतिं स्तत्र सप्तावरणसं
स्थितान् ॥४८॥ ततो गत्वा तु मौनेन नत्वा विश्वेश्वरं प्रभुं ॥ प्रदक्षिणत्रयं कृत्वा नमस्कारांश्च पंच च ॥४९॥ स्तुत्वा स्तोत्रैर्नत्वा देवं दण्डपा ॥२॥
णिं ततः परं ॥ अविमुक्तं च ढुंढिं शीतत्नो मोदादिपंचकं ॥५०॥ नमस्कारं पुनः कृत्वा विश्वनाथस्य संनिधौ ॥ श्रीमुक्तिमंडपं गत्वा प्राणिपत्य

॥श्रीः॥माघशुक्लचतुर्दश्यांमुपोष्यह्यपरेहनि॥ब्राह्मणान्भोजयेत्पश्चाद्देवंचापिसदक्षिणं॥१॥गत्वामौनेनचस्नानंज्ञानवाप्यांसमाचरेत्॥
शुक्लांबरधरोधीमान्नत्वाढुंढिविनायकं॥२॥दंडपाणिंततोनत्वादृष्ट्वाविश्वेश्वरंचमां॥श्रीमुक्तिमंडपंगत्वाकार्यंसंकल्पमात्मनः॥३॥
प्राणायामत्रयंकृत्वाजपेत्पंचाक्षरंमनुं॥करिष्येक्षेत्रसंन्यासमितिसंचिंतयेद्बुधः॥४॥पंचक्रोशाद्बहिःक्षेत्रेनगछाम्यंविकल्पते॥इ
इदंमंत्रंपठन्बुद्धेद्विस्त्रिःपंचैसमचस५॥नमस्कृत्वामहादेवंदंडपाणिंविनायकं॥साक्षीकृत्यमहात्मानंदंडपाणिविनायकं॥६॥
श्रीकालभैरवंचापिसाक्षिंकुर्यात्प्रयत्नतः॥विश्वनाथंमहादेवंनमस्कुर्यात्सुसादरं॥७॥श्रीमान्ढुंढिंदंडपाणिंभैरवंसर्वनायकं॥सा
क्षिणोनमहादेवप्रसादंवरुणालयं॥८॥एवंकृत्वाविधानेनपश्चात्कुर्यात्तुभोजनं॥सर्वसंचितवित्तानिदद्यात्सर्वंमनाज्ञया॥९॥न्कृष्णा
सेनदेवेशिसर्वकाश्यांनवेदिह॥एवंयःकुरुतेन्यासंक्षेत्रेदेविविधानतः॥१०॥सर्वपापविनिर्मुक्तोमुच्यतेनात्रसंशयः॥स्नानंत्रिषव
णंकुर्यादिशन्तश्चैवकालच॥११॥नमस्कुर्यान्महादेवंदंडपाणिंविनायकं॥श्रीकालभैरवंदेवंनियमेनदिनेदिने॥१२॥क्षेत्रप्रदक्षिणंकुर्या
नृ४ दक्षिणेचोत्तरेतथा॥पंचरात्रेणवाकुर्यात्सर्वपापनिवृत्तये॥१३॥केदारंप्रथमंस्नात्वाभीमचंडंविनायकं॥वरणासियास्फाटेमुण्यंचतुर्थे
पनजंथे॥१४॥श्रीबिंदुमाधवंविद्यासंचमंस्नात्वामुक्तमं॥पश्चाद्विश्वेश्वरंदृष्ट्वासद्योमुक्तोभवेन्नरः॥१५॥पक्षेपक्षेचतुर्दश्यांमाघेशाकानचतु
ईश॥दृष्ट्वानत्वातथाभक्त्याब्रह्महत्यांव्यपोहति॥१६॥सर्वविघ्ननिवृत्तिःस्यात्प्रतिबंधश्चनश्यति॥विमुक्तःसर्वपापेभ्योमुच्यतेनात्रसं
शयः॥१७॥यज्ञेनतपसावापिदुःप्राप्याप्राप्यकाशिकापुरी॥तस्मात्सर्वप्रयत्नेनवाराणस्यांवसेद्बुधः॥१८॥ईश्वरउवाच॥पंचक्रोशस्य

॥ ३ ॥ यथेष्टमु ॥ ५०॥ महादेव महादेव महादेव जगद्गुरो ॥ कृतार्थोहं कृतार्थोहं त्वत्प्रसादादुमापते ॥ ५१॥ विश्वनाथ महादेव मुक्तोहं दुः
खसंकटात् ॥ अद्य मे हृदयग्रंथिर्विनष्टा त्वत्प्रसादतः ॥ ५२॥ अद्य मे सफलं जन्म अद्य मे सफलं तपः ॥ अद्य मे सर्वपापानि विनष्टानि प्र
दक्षिणात् ॥ ५३॥ इत्येवमादिभिः स्तोत्रैः स्तुत्वा देवं त्रियंबकं ॥ आगाय्यानन्तरं दत्वा जपेन्मंत्रानिमं शुभं ॥ ५४॥ इति जप्त्वा यथाशक्त्या
दत्वा दानं द्विजन्मनां ॥ व्याघ्रकर मुखं मंत्रीनं च मेतनुदीरयेत् ॥ ५५॥ पंचक्रोशस्य यात्रेयं यथावद्या मया कृता ॥ न्यूनं संपूर्णतां यातु
त्वत्प्रसादादुमेश्वर ॥ ५६॥ इति जप्त्वा यथाकामं स्वेच्छया विचरेद्बुधः ॥ एकरात्रं द्विरात्रं वा त्रिरात्रं वा यथाविधि ॥ ५७॥ यस्तु कुर्यान्महा
त्म्या पंचक्रोशप्रदक्षिणं ॥ सर्वपापैर्विनिर्मुक्तो जायते नात्र संशयः ॥ ५८॥ इदं रहस्यं पापघ्नं पुण्यं ज्ञानप्रदं शुभं ॥ श्रृणुयाच्छ्रद्ध
यायस्तु श्रावयेद्वा सुसंसदि ॥ ६०॥ सोपि मुक्तो भवेद्देवि सर्वपापैर्न संशयः ॥ दूरदेशस्थिता ये च निकटे ये च सान्निध्ये ॥ ६१॥ पंच
क्रोशस्य परिक्रामकथां ते वा विमुक्तदा ॥ क्षेत्रप्रदक्षिणं नित्यं श्रोतव्यं क्षेत्रवासिभिः ॥ ६२॥ महापापौघशमनं प्रदक्षिणाफलप्रदं
॥ ६३॥ इति श्री आदिपुराणे उमामहेश्वरसंवादे पंचक्रोशस्य प्रायश्चित्तविषये पंचक्रोशयात्राविधानं नाम प्रथमो
ध्यायः ॥ संवत् १८२२ पौषशुक्ल १२ गुरौ ये लि० कुबेरजी ॥ श्रीरस्तु ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ३ ॥